॥ गोविन्दाष्टकं स्वामिब्रह्मानन्दकृतम् ॥

.. govindAShTakam by Swami Brahmananda ..

sanskritdocuments.org

July 25, 2016

Document Information

Text title : govindAShTakam svAmibrahmAnandakRitam
File name : govindAShTakambrahmAnanda.itx
Category : aShTaka
Location : doc_vishhnu
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Proofread by : Malleswara Rao Yellapragada and Proofread by ksr ramachandran ramachandran_ksr at yahoo.ca
Description-comments : BrihatstotraratnAkara
Latest update : November 24, 2012
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

॥ गोविन्दाष्टकं स्वामिब्रह्मानन्दकृतम् ॥

श्री गणेशाय नमः ॥
चिदानन्दाकारं श्रुतिसरससारं समरसं
निराधाराधारं भवजलधिपारं परगुणम् ।
रमाग्रीवाहारं व्रजवनविहारं हरनुतं
सदा तं गोविन्दं परमसुखकन्दं भजत रे ॥ १॥

महाम्भोदिस्थानं स्थिरचरनिदानं दिविजपं
सुधाधारापानं विहगपतियानं यमरतम् ।
मनोज्ञं सुज्ञानं मुनिजननिधानं ध्रुवपदम्
सदा तं गोविन्दं परमसुखकन्दं भजत रे ॥ २॥

धिया धीरैर्ध्येयं श्रवणपुटपेयं यतिवरैः
महावाक्यैर्ज्ञेयं त्रिभुवनविधेयं विधिपरम् ।
मनोमानामेयं सपदि हृदि नेयं नवतनुं
सदा तं गोविन्दं परमसुखकन्दं भजत रे ॥ ३॥

महामायाजालं विमलवनमालं मलहरं
सुबालं गोपालं निहतशिशुपालं शशिमुखम् ।
कलातीतं कालं गतिहतमरालं मुररिपुं
सदा तं गोविन्दं परमसुखकन्दं भजत रे ॥ ४॥

नभोबिम्बस्फीतं निगमगणगीतं समगतिं
सुरौघे सम्प्रीतं दितिजविपरीतं पुरिशयम् ।
गिरां पन्थातीतं स्वदितनवनीतं नयकरं
सदा तं गोविन्दं परमसुखकन्दं भजत रे ॥ ५॥

परेशं पद्मेशं शिवकमलजेशम् शिवकरं
द्विजेशं देवेशं तनुकुटिलकेशं कलिहरम् ।
खगेशं नागेशं निखिलभुवनेशं नगधरं
सदा तं गोविन्दं परमसुखकन्दं भजत रे ॥ ६॥

रमाकान्तं कान्तं भवभयलयान्तं भवसुखं
दुराशान्तं शान्तं निखिलहृदि भान्तं भुवनपम् ।
विवादान्तं दान्तं दनुजनिचयान्तं सुचरितं
सदा तं गोविन्दं परमसुखकन्दं भजत रे ॥ ७॥

जगज्ज्येष्ठं श्रेष्ठं सुरपतिकनिष्ठं क्रतुपतिं
बलिष्ठं भूयिष्ठं त्रिभुवनवरिष्ठं वरवहम् ।
स्वनिष्ठं धार्मिष्ठं गुरुगुणगरिष्ठं गुरुवरं

सदा तं गोविन्दं परमसुखकन्दं भजत रे ॥ ८॥

गदापाणेरेतद्दुरितदलनं दुःखशमनं
विशुद्धात्मा स्तोत्रं पठति मनुजो यस्तु सततम् ।
स भुक्त्वा भोगौघं चिरमिह ततोऽपास्तवृजिनो
वरं विष्णोः स्थानं व्रजति खलु वैकुण्ठभुवनम् ॥

॥ इति श्री परमहंस स्वामि ब्रह्मानन्द विरचितं
श्री गोविन्दाष्टकं सम्पूर्णम् ॥

<ःर्>

Encoded and proofread by YV Malleswara Rao malleswararaoy@yahoo.com
Proofread by ksr ramachandran ramachandran_ksr at yahoo.ca

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. govindAShTakam by Swami Brahmananda ..
was typeset on July 25, 2016

Please send corrections to *sanskrit@cheerful.com*